# ईशानादिशिवाकारमञ्चे

## रागम्: सहान ताळम्: रूपकम्

### श्री मुत्तुस्वामि दीक्षित विरचिता

पल्लवि

ईशानादिशिवाकारमञ्चे
शिवकामेश्वरवामाङ्कस्थे नमस्ते नमस्ते गौरी-

समष्टिचरणम्

श्रीशारदासंसेवितपार्श्वयुगळे

शृङ्गारकळे विनतश्यामळाबगळे

दुराशापहधुरीणतरसरसिजपदयुगळे
मुरारिगुरुगुहादिपूजितपूर्णकळे सकळे

मध्यमकाल साहित्यम्

पाशाङ्कुशेक्षुकार्मुकपञ्चसुमबाणहस्ते
देशकालवस्तुरूपदिव्यचक्रमध्यस्थे

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇